# विवेकानन्दप्रेषितं पत्रम्

## स्वामी विवेकानन्दः

[श्रीशरच्चन्द्रचक्रवर्तिनं सम्बोध्य संस्कृतेन प्रणीय १८९७-तमवर्षस्य मार्च्-मासस्य ऊनविंशदिनाङ्के आल्मोडातः श्रीमत्स्वामिविवेकानन्दपादैः प्रेषितं पत्रम्]

ओं नमो भगवते रामकृष्णाय

शुभमस्तु। आशीर्वादप्रेमालिङ्गनपूर्वकम् इदं भवतु तव प्रीतये। पाञ्चभौतिकं मे पिञ्जरम् अधुना किञ्चित् सुस्थतरम्। अचलगुरोर्हिमानी-मण्डितशिखराणि पुनरुज्जीवयन्ति मृतप्रायान् अपि जनान् इति मन्ये। श्रमबाधापि कथञ्चित् दूरीभूतेत्यनुभवामि। यत् ते हृदयोद्वेगकरं मुमुक्षुत्वं लिपिभङ्ग्या व्यञ्जितं, तन्मया अनुभूतं पूर्वम्। तद् एव शाश्वते ब्रह्मणि मनः समाधातुं प्रसरति। 'नान्यः पन्था विद्यतेऽयनाय।' ज्वलतु सा भावना अधिकम् अधिकं यावन्नाधिगतानाम् एकान्तक्षयः कृताकृतानाम्। तद् अनु सहसैव ब्रह्मप्रकाशः सह समस्तविषयप्रध्वंसैः। आगामिनी सा जीवन्मुक्तिस्तव हिताय तवानुरागदार्ढ्येनैवानुमेया। याचे पुनस्तं लोकगुरुं महासमन्वयाचार्य-श्री १०८ रामकृष्णम् आविर्भवितुं तव हृदयोद्देशं येन वै कृतकृतार्थस्त्वम् आविष्कृतमहाशौर्यः लोकान् समुद्धर्तुं महामोहसागरात् सम्यग् यतिष्यसे। भव चिराधिष्ठित ओजसि। वीराणाम् एव करतलगता मुक्तिर्न कापुरुषाणाम्। हे वीराः, बद्धपरिकराः भवत; सम्मुखे शत्रवः महामोहरूपाः। 'श्रेयांसि बहुविघ्नानि' इति निश्चितेऽपि समधिकतरं कुरुत यत्नम्। पश्यत इमान् लोकान् मोहग्राहग्रस्तान्। शृणुत अहो तेषां हृदयभेदकरं कारुण्यपूर्णं शोकनादम्। अग्रगाः भवत, अग्रगाः हे वीराः, मोचयितुं पाशं बद्धानां, श्लथयितुं क्लेशभारं दीनानां, द्योतयितुं हृदयान्धकूपम् अज्ञानाम्। अभीरभीरिति घोषयति वेदान्तडिण्डिमः। भूयात् स भेदाय हृदयग्रन्थीनां सर्वेषां जगन्निवासिनामिति—

तवैकान्तशुभभावुकः
विवेकानन्दः